# Shri Viththalaprabodhah

# શ્રીવિઠ્ઠલપ્રબોધઃ

## Document Information

Text title : viThThalaprabodhaH

File name : viThThalaprabodhaH.itx

Category : vishhnu, suprabhAta, puShTimArgIya, viThThaleshvara

Location : doc_vishhnu

Author : viThThaleshvara viThThaleshvara

Proofread by : PSA Easwaran psawaswaran at gmail.com

Description/comments : Edited by S. V. Radhakrishna Shastriji

Acknowledge-Permission: Mahaperiaval Trust

Latest update : May 13, 2018

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

November 23, 2019

*sanskritdocuments.org*

# શ્રીવિઠ્ઠલપ્રબોધઃ

વિઠ્ઠલેશ્વરકૃતઃ ।
જય જય તુહિનકરનિકરકુડ્મલિતકમલાવલીનિલીનતયા
નિવૃત્તમધુકરનિકરમધુરતરોદ્ઘોષોદ્ધતિવિહતનિદ્ર
ભદ્ર સુભદ્રાગ્રજ ॥ ૧॥

જય જય નિજમુખકમલામલપરિમલાઘ્રાણજનિતસુખાતિશયેનૈવ
સઞ્જાતસુખનિદ્રાવિદ્રાવણભિયેવ નયનયુગલખઞ્જરીટોન્મીલનભિયેવ
ઝઙ્કારરહિતૈરલિભિરિવાલકશતૈઃ પરિવૃતવદનારવિન્દ ગોવિન્દ ॥ ૨॥

જય જય નિશાકરકરવિકચકુવલયકોશનિર્યાતદિવાકરકરનિકરકુઞ્ચિત-
કમલાવલિકોશસ્થિતિજનિતમધુરમધુપાનોન્મોદમુદિતભૃઙ્ગાઙ્ગનારવમધુર-
તરોદ્ઘોષવિદ્રાવિતનિદ્ર નિખિલગોપીજનજનિતનિજાધારહિન્દોલાન્દોલન-
ચલદમલવલયઝણત્કારેણ મધુરતરનિનદવીણાગીતાદિભિરુન્નિદ્ર-
નયનખઞ્જરીટયુગલ ॥ ૩॥

જય જય તતઃ કિઞ્ચિદુન્મીલનોન્નતભ્રૂલતાસમશરાસનચ્યુતકુસુમ-
વિશિખદ્વયેનેવ ગોપીજનવદનશરદિન્દુવિભ્રમસઞ્ચરત્ખઞ્જનયુગલેનેવ
હિન્દોલાન્દોલનચલદમલસુભગબલ્લવીગણ્ડમણ્ડલસ્ફુરત્તાટઙ્ક-
માર્તણ્ડભ્રમવિકસિતકમલદ્વયેનેવારુણતરામલરાધાધરદીધિતિ-
કિર્મીરિતદરહસનપ્રકટરદનાવલીતુહિનકરપ્રતિભટપ્રભાજનિતશારદ-
શર્વરીપત્યુદયભ્રમવિકસિતકુમુદદ્વયેન પ્રકટિતનયનયુગેનેક્ષિત-
નિખિલનિતમ્બનીવૃન્દ ॥ ૪॥

જય જય નિજદૃગન્તપાતસોપાનસમારૂઢમકરકેતુભિર્નિજવદનશરદિન્દુ-
સમ્ફુલ્લાતિલોલલોચનકુવલયાભિરનલ્પાકલ્પભૂષિતાભિર્નિજનિતમ્બ-
બિમ્બાલઙ્કૃતસુધાકરકરધવલવિશદસુભગતલ્પાભિર્હરિકરકમલ-
નખશરસમ્પાતપરાજિતાનઙ્ગપૃતનાભિરિવ વિગલિતકઞ્ચિકાઞ્ચલ-
નિતમ્બામ્બરભૂષાભિઃ અતિસુભગવિશદજઘનકનકાસનોપવેશિત-

પ્રિયાભિર્નિજનખદૃગન્તવિવિધપ્રસૂનાર્ચિતવલ્લભાભિઃ સુરતવિદ્યાવિનોદ-
ચતુરાભિર્ભાવાધિગમસમયે પ્રિયવિયોગશઙ્કયાન્તર્નયનદ્વારં પ્રવેશ્ય
પિહિતકપાટાભિરિવ નિમીલિતનયનાભિઃ ક્રીડિત ॥ ૫॥

જય જય પુનરતિનિર્વૃતિવિહિતનિદ્ર જાગૃહિ જાગૃહિ ॥ ૬॥

ન યાવદેષ કુઙ્કુમારુણાંશુરિન્દિરાપતે
પુરન્દરીયદિઙ્મુખં સમેતિ તાવદુત્થિતઃ ।
પ્રમાર્જયાનનામ્બુજં નિજાધરં ચ સુન્દરં
કદમ્બશોભિતાન્તરસ્વતલ્પમન્મથોદયમ્ ॥ ૭॥

ન ચેદમી શમીતરુપ્રસૂનતલ્પકઞ્ચુકં
નખક્ષતં ચ મેચકાધરં સકુઙ્કુમં મુખમ્ ।
વિલોક્ય નાગરા જનાસ્ત ઈદૃશીં તવ સ્થિતિં
પ્રભો સભાસુ ભાષિતું સમુજ્ઝિતોક્તયો ન હિ ॥ ૮॥

સ્ફુરત્ત્વન્મુખામ્ભોજશોભાનિવૃત્તસ્વસૌન્દર્યગર્વાચલઃ શર્વરીશઃ ।
હ્રિયા મજ્જતિ ક્ષીરવારાન્નિધૌ તન્નખાલિચ્છટાભિશ્ચ તુચ્છીકૃતોઽયમ્ ॥ ૯॥

દિવાકરોઽયમુત્કટસ્ત્વદઙ્ઘ્રિપઙ્કજાર્હણં
વિધાતુમાગતોઽમ્બુજૈસ્તદર્હણં સભાજય ।
કલિન્દજા ત્વદાનનાવલોકનાય દૃક્સરો
જનૂંષિ સમ્પ્રસારયત્યનઙ્ગકોટિસુન્દર ॥ ૧૦॥

સ્ફુરત્સરોજનિર્ગતદ્વિરેફયૂથગાયકા
યશોદયાવતન્વતે દિશં શુભાય દર્શનાર્થિનઃ ।
જગદ્વિલોચને હરે કુરુષ્વ સાર્થજન્મકે
કૃપાં કુરુષ્વ વિઠ્ઠલે સ્વપાદપદ્મસેવકે ॥ ૧૧॥

ઇતિ વિઠ્ઠલેશ્વરકૃતઃ શ્રીવિઠ્ઠલપ્રબોધઃ સમ્પૂર્ણઃ ।

Proofread by PSA Easwaran psaeaswaran at gmail.com

*Shri Viththalaprabodhah*

pdf was typeset on November 23, 2019

Please send corrections to *sanskrit@cheerful.com*